# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 5 | गुणाः – ५० |
| विषयः – धर्मशास्त्रम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – विदुरनीतिः १-८ अध्यायाः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।**

१ नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥

२ एकं हन्यान्न वा हन्यादिषुमुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥

३ एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत् ।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥

**प्रश्नः २ विदुरनीत्यनुसारं पण्डितलक्षणानि लिखत ।**

**प्रश्नः ३ विदुरनीतिग्रन्थोक्तानि मूर्खलक्षणानि लिखत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥

२ द्वे कर्मणी नरः कुर्वन्नस्मिल्लोके विरोचते ।
अब्रुवन् पुरुषं किञ्चिदसतोऽनर्चयस्तथा ॥

३ हरणं च परस्वानां परदाराभिमर्शनम् ।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ॥

**प्रश्नः ५ द्वितीयाध्याये विदुरनिरूपितकर्तव्याकर्तव्यविषये यथाग्रन्थं वर्णयत ।**

**प्रश्नः ६ विदुरकथितकेशिनी, विरोचनः एवं सुधन्वाकथां लिखत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥

२ सन्तापाद् भ्रश्यते रूपं सन्तापाद् भ्रश्यते बलम् ।
सन्तापाद् भ्रश्यते ज्ञानं सन्तापाद् व्याधिमृच्छति ॥

३ न वै भिन्ना जातु चरन्ति धर्मं न वै सुखं प्राप्नुवन्तीह भिन्नाः ।
न वै भिन्ना गौरवं प्राप्नुवन्ति न वै भिन्ना प्रशमं रोचयन्ति ॥

**प्रश्नः ८ विदुरनीतिग्रन्थोक्तानि भिक्षुकलक्षणानि प्रतिपादयत ।**

**प्रश्नः ९ विदुरनीत्यनुसारं विद्यार्थीनां सप्तदोषाः के ? चर्चयत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ कः अजातशत्रुरूपेण ख्यातः अस्ति ?
२ शकुनिः कस्य पुत्रः ?
३ स्वर्गस्य सोपानं किम् ?
४ कः अमित्रं मित्रं कुरुते ?
५ वह्निः स्वयं कदा साम्यति ?
६ न्यायार्जितस्य द्रव्यस्य कः उपयोगः ?
७ कौ द्वौ सूर्यमण्डलभेदिनौ ?
८ संसारे कतिविधाः पुरुषाः ?
९ नरकद्वाराणि किं किम् अस्ति ?
१० के पञ्चाग्नयः ?
११ केषां पूजनेन संसारे यशःप्राप्तिः भवति ?
१२ अभ्युदयः काङ्क्षिजनेन के दोषाः त्याज्याः ?
१३ चिकित्सकाः कथं जीवन्ति ?
१४ शरीरनगरं कति द्वारयुक्तम् ?
१५ कः षट्पदः उच्यते ?

****